शोभा कान्तिश्च दीप्तिश्च माधुर्यञ्च प्रगल्भता। औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः। पूर्वे भावादयो धैर्य्यान्ता दश नायकानामपि सम्भवन्ति किन्तु सर्वेऽप्यमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति” तल्लक्षणमुदाहरणं च तत्रैव। “मुक्तात्मश्लाघना धैर्य्यं मनोवृत्तिरचञ्चला। यथा “ज्वलतु गगने रात्रौ रात्राव खण्डकलः शशी दहतु मदनः किं वा मृत्योः परेण विधास्यति। मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया कुलममलिनं न त्वेवायं जनो न च जीवितम्”

धीरपत्नी स्त्री धीरं मनोहरं पत्रमस्याः ङीप्। १धरणीकन्दे राजनि०। २मनोहरपत्रयुक्ते त्रि० स्त्रियां टाप्।

धीरप्रशान्त पु० “सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्” सा० द० लक्षिते नायकभेदे यथा मालतीमाधवादौ माधवादिः।

धीरललित पु० “निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्” सा० द० १लक्षिते नायकभेदे यथा रत्नावल्यादौ वत्सराजादि। २षोडशाक्षरपादके छन्दोभेदे स्त्री “संकथिता भरौ नरनगाश्च धीरललिता” छ०र०टी०।

धीरस्कन्ध पुंस्त्री धीरः अचञ्चलः स्कन्धोऽवयवोऽस्यात्। महिष्के हेमच०।

धीराधीरा स्त्री “धीराधीरा (मध्या) तु रुदितैरधीरा परुषोक्तिभिः” “धीराधीरा (प्रगल्भा) तु सोल्लुण्ठभाषितैः खेदयेदमुम्” सा० द० उक्ते नायिकाभेदे अस्य नायकम् यथा “अनलङ्कृतोऽपि सुन्दर! हरसि मनो मे यतः प्रसभम्। किं पुनरलङ्कृतस्त्वं संप्रति नखरक्षतैस्तस्याः”। [ अपपाठश्चे नैवष्ट्पार०।

धीरावी स्त्री धीरमवति अव-प्रीणने अण् ङीप्। शिं-

धीरोदात्त पु० “अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः। स्थेयान् निगूढ़मानो धीरोदात्तो दृढ़व्रतः कथितः” सा०द० लक्षिते नायकभेदे “अविकत्थनोऽनात्मश्लाघाकरः महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः। निगूढ़मानो विनयच्छन्नगर्वः। दृढ़व्रतोऽङ्गीकृतनिर्वाहकः” सा०द० यथा रामयुधिष्ठिरादि।

धीरोद्धत पु० “मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः। आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः” सा०द०लक्षिते १नायकभेदे यथा भीमसेनादिः। कर्म० २धैर्य्यान्वितोद्धते च “धीरोद्धतः पापकारी व्यसनी प्रतिनायकः”सा०द०

धीरोष्णिन् विश्वदेवभेदे। “शैलाभः परमक्रोधी धीरोष्णी भूपतिस्तथा” भा० अनु० ९१ अ०। विश्वदेवनामोक्तौ

धीर्य्य त्रि० धीरे भवः “भवे छन्दसीति” पा० यत्। कातरे माधवः “पाका चिदसवो धीर्य्याः” ऋ० २।२७।११। “धीर्य्याः कातराः” इति भाष्यम्।

धीलटि स्त्री लट-बाल्योक्तौ इन् धिया कर्मणा लटिः। कर्मणा बाल्योक्तियुतायाम्। दुहितरि हारा०।

धीवत् त्रि०धीरस्त्यस्य मतुप् वेदे मस्य वः। बुद्धियुक्ते “धीवतो धीवतः सखा” ऋ० ६।५५।२ “धिया धीवन्तो असपन्त तत्रुवः” ऋ० ७।८३।८।

धीवन् त्रि० ध्यै-क्वनिप् संप्रसारणम्। १ध्यानयुक्ते २कर्मयुते उणादिकोषः। स्त्रियां “वनो र च” पा० ङीप् रश्चान्तादेशः। धीवरी बहुव्रीहौ ङीप् रश्च वा। बहुधीवरी बहुधीवा।

धीवर पुंस्त्री दधाति मत्स्यान् जिलरेत्यादिना नि०। १कैवर्त्ते २तद्भार्य्यायां स्त्री ङीप्। सा च बुद्धिकर्मभ्यां युतस्त्रियाम् धीवरशब्दे दृश्यम्।

धीशक्ति स्त्री ६त० बुद्धेर्गुणे अमरः धीगुणशब्दे दृश्यम्।

धीसचिव पु० धियि बुद्धौ मन्त्रणादौ सचिवः धीप्रधानः सचीवो वा शाकत०। मन्त्रणानिपुणे मन्त्रिणि धीसखा धीसहायादयोऽप्यत्र।

धु कम्पने अक०चालने सक०स्वादि०उभ०अनिट्। धुनोति धुनुते पर०सिचि इट् गुण०। अधावीत् पा०निट् दुधाव दुधुविव दुधोथ दुधुविव दुधुवे। धोष्यति “धूनोति चम्पकवनानि धुनोत्यशोकम्” कविरहस्यम्। अयं दीर्घान्तोऽपि स वेट् प० सिचि नित्येट् पा० अधावीत् अधविष्ट अधोष्ट क्रादिनियमात् किति ङिति नित्यमिट् दुधुविव। थलि तु दुधविथ दुधोथ। धविष्यति ते धोष्यति ते। उभयोः धू(धु)तः। “धुन्वन् सर्वपथीनं खे वितानं पत्रयोरसौ” “तानधावीत् समाहूतान्” भट्टिः। “अघं धुन्वन्ति कार्त्स्न्येन” भाग० ६।१।१५। णिचि धावयति दीर्घान्तस्य धूनयति “आ धेनवो धुनयन्तामशिश्वीः” ऋ०३।५५।१६। “हुस्वश्छान्दसः” भा०“नितान्तनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः” माघः। दोधूयते तत्र कम्पने चलने “दोधूयमानाश्च महापताकाः” भा० भी० ६० अ०।

उपसर्गपूर्वकस्तु तत्तदुपसर्गद्योत्यार्थयुते कम्पने चालने च

धु स्त्री धु-कम्पने बा० भावे डु। कम्पने एकाचरकोषः।

धुच्च सन्दीप्तौ क्लेशे जीवने च अक० आत्म०। धुचते अधु-